# ३. श्रीउज्जयन्तस्तवः ।

नामभिः श्री**रैवतकोज्जयन्ता**द्यैः [1]प्रथामितम् । श्री**नेमि**पावितं स्तौमि **गिरिनारं**[2] गिरीश्वरम् ॥ १ ॥
स्थाने देशः **सुराष्ट्रा**ख्यां बिभर्ति भुवनेष्वसौ[3] । यद्भूमिकामिनीभाले गिरिरेष विशेषकः ॥ २ ॥
शृङ्गारयन्ति [4]**खंगार**दुर्गं श्री**ऋषभा**दयः । श्री**पार्श्वस्तेजलपुरं** भूषितैतदुपत्यकम्[5] ॥ ३ ॥
योजनद्वयतुङ्गेऽस्य[6] शृङ्गे जिनगृहावलिः । पुण्यराशिरिवाभाति शरच्चन्द्रांशुनिर्मला ॥ ४ ॥
सौवर्णदण्डकलशामलसारकशोभितम् । चारुचैत्यं चकास्त्यस्योपरि श्री**नेमि**नः प्रभोः ॥ ५ ॥
श्री**शिवासूनु**देवस्य पादुकात्र निरीक्षिता । स्पृष्टाऽर्चिता च शिष्टानां पापव्यूहं व्यपोहति ॥ ६ ॥
प्राज्यं राज्यं परित्यज्य जरत्तृणमिव प्रभुः । बन्धून् विधूय च स्निग्धान् प्रपेदेऽत्र महाव्रतम् ॥ ७ ॥
अत्रैव केवलं देवः स एव प्रतिलब्धवान् । जगज्जनहितैषी स पर्यणैषीच्च निर्वृतिम् ॥ ८ ॥
अत एवात्र कल्याणत्रयमन्दिरमादधे । श्री**वस्तुपालो** मन्त्रीशश्चमत्कारितभव्यहृत्[7] ॥ ९ ॥
जिनेन्द्रबिम्बपूर्णेन्द्रमण्डपस्था जना इह । श्री**नेमे**र्मज्जनं कर्तु**मिन्द्रा** इव चकासति ॥ १० ॥
**गजेन्द्रपद**नामास्य कुण्डं मण्डयते शिरः । सुधाविधैर्जलैः पूर्णं स्नानार्हत्स्नपनक्षमैः ॥ ११ ॥
**शत्रुञ्जया**वतारेऽत्र **वस्तुपाले**न कारिते । **ऋषभः पुण्डरीको**ऽ**ष्टापदो नन्दीश्वर**स्तथा ॥ १२ ॥
सिंहयाना हेमवर्णा **सिद्ध-बुद्ध**सुतान्विता । कम्राम्रलुम्बिभृत्पाणिरत्रा**म्बा** सङ्घविघ्नहृत् ॥ १३ ॥
श्री**नेमि**पत्पद्मपूत**मवलोकन**नामकम् । विलोकयन्तः शिखरं यान्ति भव्याः कृतार्थताम् ॥ १४ ॥
**शाम्बो जाम्बवती**जातस्तुङ्गे शृङ्गेऽस्य **कृष्णजः** । **प्रद्युम्न**श्च महाद्युम्नस्तेपाते दुस्तपं तपः ॥ १५ ॥
नानाविधौषधिगणा जाज्वलन्त्यत्र रात्रिषु । किं च **घण्टाक्षरच्छत्रशिलाः** शालन्त उच्चकैः ॥ १६ ॥
**सहस्राम्रवणं लक्षारामो**ऽन्येपि वनव्रजाः । मयूरकोकिलाभृङ्गीसङ्गीतिसुभगा इह ॥ १७ ॥
न स वृक्षो न सा वल्ली न तत्पुष्पं न तत्फलम् । नेक्ष्यते[8]ऽत्राभियुक्तैर्यदित्यैतिह्यविदो विदः ॥ १८ ॥
**राजीमती** गुहागर्भे कैर्न नामात्र वन्द्यते । **रथनेमि**र्ययोन्मार्गात्सन्मार्गमवतारितः[9] ॥ १९ ॥
पूजास्नपनदानानि तपश्चात्र कृतानि वै[10] । संपद्यन्ते मोक्षसौख्यहेतवो भव्यजन्मिनाम् ॥ २० ॥
दिग्भ्रमादपि[11] योऽत्राद्रौ क्वाप्यमार्गेऽपि सञ्चरन् । सोऽपि पश्यति चैत्यस्था [12]जिनार्चाः स्नापितार्चिताः ॥ २१ ॥
**काश्मीरा**गतरत्नेन **कूष्माण्ड्या**देशतोऽत्र च । लेप्यबिम्बास्पदे न्यस्ता श्री**नेमे**र्मूर्तिराश्मनी ॥ २२ ॥
नदीनिर्झरकुण्डानां खनीनां वीरुधामपि । विदांकरोत्वत्र संख्यां संख्यावानपि कः खलु ॥ २३ ॥
आसेचनकरूपाय[13] महातीर्थाय तायिने । चैत्यालङ्कृतशीर्षाय नमः श्री**रैवताद्र**ये ॥ २४ ॥
स्तुतो मयेति सूरीन्द्रवर्णितावृ**जिनप्रभ** । **गिरिनार**स्तारहेमसिद्धि[14]भूमिर्मुदेऽस्तु वः ॥ २५ ॥

॥ इति श्री**उज्जयन्त**स्तवः ॥

॥ ग्रन्थाग्रं २५ ॥

---

1 A प्रया° । 2 B °नार–। 3 B भुवनेऽप्यसौ । 4 A °स्तंषगार° । 5 A °पत्यकां । 6 A °तुङ्गस्य । B 7 °भव्यकृत् । 8 A नेक्षते । 9 A °तारिता । 10 A यैः । 11 A C °भूमावपि । 12 A जिनार्चास्तर्पिता° । 13 B आसवेनक° । 14 C सिद्ध° ।